Target's

SSC संस्कृत - मन्दाकिनी

कृतिपत्रिका संच

Eng. & Mar. Med.

(10 Model Question Papers)

Salient Features

- According to the New Paper Pattern
- 3 Fully Solved Model Question Papers
- 7 Question Papers for intensive practice
- Lucid and easy flow of language

Printed at: **Print to Print,** Mumbai

© *Target Publications Pvt. Ltd.*
No part of this book may be reproduced or transmitted in any form or by any means, C.D. ROM/Audio Video Cassettes or electronic, mechanical including photocopying; recording or by any information storage and retrieval system without permission in writing from the Publisher.

P.O. No. 88747

10480_11130_JUP

Index

No.	Subject	Test	Page No.	
			Question Papers	Model Answers
1.	Sanskrit	1	4	85
		2	12	93
		3	20	101
		4	28	*For Additional Practice*
		5	36	
		6	44	
		7	52	
		8	60	
		9	68	
		10	76	

Note: For गद्यम् विभागः कृतिः 1 अ 3 स्वमतप्रकटनम्, पद्यम् विभागः कृतिः 2 अ 2 तात्पर्यलेखनम् / स्पष्टीकरणम् and षष्ठः विभागः - अनुवादकौशलम् questions, we have provided the model answers in English as well as in Marathi language.

कृतिपत्रिकायाः प्रारूपम्

Marking Scheme (for March 2017 exam and onwards)

प्रथमः विभागः- गद्यम्।

(अवबोधनम्, शब्दसम्पत्तिः, पृथक्करणम्)

कृति 1. अ. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।

अ 1. अवबोधनम्। (केऽपि 2 कृती कुरुत।) 2
(100-120 शब्दपरिमितः गद्यांशः।)

अ 2. शब्दज्ञानम्। (काः अपि 3 कृतीः कुरुत।) 3

अ 3. स्वमतप्रकटनं माध्यमभाषया। 2

कृति 1. ब. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।

ब 1. अवबोधनम्। (केऽपि 2 कृती कुरुत।) 2
(100-120 शब्दपरिमितः गद्यांशः।)

ब 2. शब्दज्ञानम्। (काः अपि 3 कृतीः कुरुत।) 3

ब 3. पृथक्करणम्। (केवलं क्रमसंयोजनम्।) 2

कृति 1. क. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।

क 1. अवबोधनम्। (केऽपि 2 कृती कुरुत।) 2
(100-120 शब्दपरिमितः गद्यांशः।)

क 2. शब्दज्ञानम्। (काः अपि 3 कृतीः कुरुत।) 3

क 3. पृथक्करणम्। (वृक्षरेखाचित्रम् /जालरेखाचित्रम् / स्तम्भपूरणम्।) 2

अवबोधनस्य कृतयः i, ii, iii कृतयः प्रष्टव्याः।

i. उचितं पर्यायं / कारणं चित्वा वाक्यं पुनर्लिखत।

ii. कः कं वदति। / पूर्णवाक्येन उत्तरं लिखत।

iii. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं / योग्यं वा अयोग्यं लिखत।

शब्दज्ञानस्य कृतयः i, ii, iii, iv कृतयः प्रष्टव्याः।

i. सन्धिविग्रहः।
कृतयः - चतुर्थपदं लिखत / पूर्वपदं लिखत / उत्तरपदं लिखत। उचितं पर्यायं चित्वा लिखत।

ii. पर्यायशब्दाः / विलोमशब्दाः / भिन्नार्थकशब्दाः।
कृतयः - चयनम् / मेलनम् / समूहेतरपदस्य / चतुर्थपदस्य लेखनम्।

iii. विशेषण - विशेष्य - अन्वितिः।
कृतयः - चयनम् / मेलनम् / चतुर्थपदस्य लेखनम्।

iv. धातुसाधित - अव्ययानां (त्वान्त / ल्यबन्त / तुमन्त) / विभक्त्यन्तपदानां चयनम्।

द्वितीयः विभागः- पद्यम्।

(पृथक्करणं, स्पष्टीकरणं, शब्दसम्पत्तिः, अन्वयपूर्तिः, स्मरणं, वृत्तज्ञानम्।)

कृति 2.अ. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।

अ 1. पृथक्करणम्। (वृक्षरेखाचित्रम् / जालरेखाचित्रम् / स्तम्भपूरणम्।) 2
(6-8 पङ्क्तिपरिमितः पद्यांशः।)

अ 2. तात्पर्यलेखनम् / स्पष्टीकरणम्। 2

कृति 2. ब. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।

ब 1. शब्दज्ञानम्। 2

(6-8 पङ्क्तिपरिमितः पद्यांशः।)

ब 2. अन्वयपूर्तिः। 2

कृति 2. क. स्मरणम् – श्लोकलेखनम्। (केवलं 2) 4

कृति 2. ड. वृत्तज्ञानम्। 1

स्पष्टीकरणम् – पद्यांशस्य मध्यवर्तिकल्पनां / संकल्पनां माध्यमभाषया स्पष्टं कुरुत।

अन्वयपूर्तिः – अन्वये विद्यमानानि चत्वारि रिक्तस्थानानि श्लोकतः शब्दान् चित्वा पूरयत।

शब्दज्ञानस्य कृतयः i, ii एकैकगुणस्य कृते प्रष्टव्ये।

i. पर्यायशब्दौ / विलोमशब्दौ / भिन्नार्थकशब्दौ।
   कृतयः - चयनम् / मेलनम् / समूहेतरपदस्य / चतुर्थपदस्य लेखनम्।
ii. विशेषण - विशेष्य-अन्विितिः।
   कृतयः - चयनम् / मेलनम् / चतुर्थपदस्य लेखनम्।

स्मरणम् - 3 पर्यायेषु 2 श्लोकौ शुद्धौ पूर्णौ लेखनीयौ।

वृत्तज्ञानम् - वृत्तनाम चित्वा लेखनीयम्।

तृतीयः विभागः- स्थूल वाचनम्।

(गद्यम्/पद्यम् – अवबोधनम्, पृथक्करणम्)

(80-120 शब्दपरिमितः एकः गद्यांशः वा 16-18 पङ्क्तिपरिमितः एकः पद्यांशः।)

कृति 3. गद्यांशं / पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।

3. अ अवबोधनम्।

कृतीः i. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं / योग्यं वा अयोग्यं लिखत। 1

ii. एकपदेन उत्तरं लिखत। 1

3. ब. पृथक्करणम् – कृतयः - वृक्षरेखाचित्रम् / जालरेखाचित्रम् / मेलनम् (शब्दानाम् / श्लोकांशानाम्।) 2

चतुर्थः विभागः- लेखनकौशलम्।

कृति 4. यथानिर्देशं कृतीः कुरुत। (केवलं 3 उपप्रश्नाः लेखनीयाः।)

अ. कथापूर्तिः / परिच्छेदपूर्तिः-
मञ्जूषातः उचितान् शब्दान् चित्वा 5 रिक्तस्थानानि पूरयित्वा कथां / परिच्छेदं पुनर्लिखत। (परिशिष्टम् 6) 5

ब. निबन्धलेखनम् - 3 पर्यायेषु 1 विषयम् अधिकृत्य 5 वाक्यात्मकं निबन्धं लिखत। (परिशिष्टम् 7) 5

क. संस्कृतानुवादः - 8 वाक्येषु 5 वाक्यानां संस्कृतभाषया अनुवादं कुरुत। (परिशिष्टम् 2) 5

ड. वाक्यरचना - (परिशिष्टम् 1)

i. धातूनां प्रयोगः - 4 धातुषु 3 धातून् प्रयुज्य 3 वाक्यानि संस्कृतभाषया लिखत। 3

ii. अशुद्धिसंशोधनम् – अव्ययानि प्रयुज्य रचितेषु 4 वाक्येषु 2 वाक्ययोः अशुद्धिसंशोधनं कुरुत। 2

पञ्चमः विभागः- व्याकरणम् – उपयोजनकौशलम्।

कृति 5. यथानिर्देशं कृतीः कुरुत। (केवलं 5 उपप्रश्नाः लेखनीयाः।)

अ. क्रियापदरूपैः आवलिपूरणम्। (8 पर्यायेषु 6 पर्यायाः लेखनीयाः।) 3

(प्राधान्येन दशमीकक्षायाः कृते निर्धारितानां गणानां कालार्थरूपाणि तथा द्वितीयभविष्यत्कालस्य,परोक्षभूतकालस्य च रूपाणि।)

ब. नाम + सर्वनाम्नारूपैः आवलिपूरणम्। (8 पर्यायेषु 6 पर्यायाः लेखनीयाः।) 3

(प्राधान्येन दशमीकक्षायाः कृते निर्धारितानि नामानि तथा एतत्, सर्व, अन्य, इदम्, अस्मद्, युष्मद् सर्वनामानि।)

क. धातुसाधितविशेषणानां पृथक्करणम्। (कोष्ठकपूर्तिः।) (8 पर्यायेषु 6 पर्यायाः लेखनीयाः।) 3

(कर्त.भू.धा.वि., कर्म.भू.धा.वि., क.वि.धा.वि., व.का.धा.वि. – प्रथमाएकवचनस्य रूपाणि।)

(Past Active Participle, Past Passive Participle, Potnetial Passive Participle, Present Active Participle, Nominative singular forms)

ड. समासाः। - (8 पर्यायेषु 6 पर्यायाः लेखनीयाः।) 3

कृती-समस्तपदानां / विग्रहवाक्यानां समासनामभिः सह मेलनम् / कोष्ठकपूरणम्।

इ. वाक्यपरिवर्तनम्। (4 पर्यायेषु 3 पर्यायाः लेखनीयाः।) 3

i. प्रयोगपरिवर्तनम्। (Change the vocie)

ii. सतिसप्तमीरचना। (Absolute Locative)

iii. प्रयोजकरचना। (Causative Construction)

iv. त्वम् ↔ भवान् इति परिवर्तनम् । (interchange त्वम् ↔भवान्)

फ. सङ्ख्यावाचकाः। (व्याकरणविवेचनम् 7) (4 पर्यायेषु 3 पर्यायाः लेखनीयाः।) 3

कृतिः- रिक्तस्थानपूर्तिः।

षष्ठः विभागः- अनुवादकौशलम्।

कृति 6. यथानिर्देशं कृतीः कुरुत।

अ. संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत। (परिशिष्टम् 3) 4

ब. संस्कृतपद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत। (परिशिष्टम् 4) 4

क. संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत। (परिशिष्टम् 5) 4

S.S.C. PRELIMINARY EXAMINATION – 1

संस्कृत - मन्दाकिनी (Entire)

समयः होरात्रयम्। **गुणाः 80**

प्रथमः विभागः – गद्यम्।

(अवबोधनम्, शब्दसम्पत्तिः, पृथक्करणम्)

कृतिः 1.अ. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।

अ 1. अवबोधनम्। (केऽपि 2 कृती कुरुत।)

i. उचितं कारणं चित्वा वाक्यं पुनर्लिखत। **[1]**

अदितिः आचार्यायाः दर्शनार्थम् आगता। यतः _____।

(सा राज्यनाट्यस्पर्धायाः कृते आचार्यां निमन्त्रयितुम् ऐच्छत् / सा तस्याः मनसि उत्पन्नां नाट्यविषयिणीं जिज्ञासां पूरयितुम् ऐच्छत्)

ii. पूर्णवाक्येन उत्तरं लिखत। **[1]**

केन नाट्यशास्त्रं विरचितम्?

iii. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत। **[1]**

अदितेः नाटकं रौद्ररसप्रधानं वर्तते।

[अभिनयं कर्तुमुत्सुका छात्रा अध्यापिकां प्रति गत्वा पृच्छति।]

अदितिः – आचार्ये, नमो नमः। नाट्यविषयिणी जिज्ञासा भवत्याः दर्शनार्थं मां प्रेरयति।

आचार्य – किं कारणं ते जिज्ञासायाः?

अदितिः – अस्माकं शालया राज्यनाट्यस्पर्धायाः कृते संस्कृतनाट्यस्य प्रयोगः करणीयः इति सुनिश्चितम्। झाशीराज्ञी लक्ष्मीबाई मया अभिनेतव्या । वीररसप्रधानमेतन्नाटकमिति दिग्दर्शकेन कथितम्। भरतमुनिविरचितं नाट्यशास्त्रं नाट्यरसान् च भवती जानाति। अतः तद्विषये प्रष्टुमहमागता।

आचार्या – शृणु। प्रायः ख्रिस्तपूर्वं तृतीयशतके भरतमुनिना नाट्यशास्त्रं विरचितम्। एतन्नाट्यशास्त्रं नाम पञ्चमो वेद इति मन्यते बुधैः। तस्मिन् ग्रन्थे नाट्योपयुक्तानां रसानां विषये तेषां भावविषयेऽपि मुनिना कथितमस्ति।

अदितिः – के नाम रसाः भावाश्च? नाट्येषु रसाभिव्यक्तिः कथं संभवति?

आचार्या – भरतमुनिः कथयति यथा महानसे षड्रसैर्युक्तं समुचितपाकक्रियाभिः सिद्धं भोजनमास्वाद्यं भवति, नाट्ये तथैव विविधभावैर्युक्ता अभिनयसहिता कलाकृतिः रसिकजनानां कृते आस्वादनीया मनोहारिणी च भवति। तस्मादेते विशेषभावाः नाट्यरसाः इति व्याख्याताः।

अदितिः – कति रसाः? कानि च तेषां नामानि?

अ 2. शब्दज्ञानम्। (काः अपि 3 कृतीः कुरुत।)

i. उचितं पर्यायं चित्वा लिखत। **[1]**

1. भावाश्च = _____ + _____ । (भावा + श्च / भावः + च / भावाः + च)
2. एतन्नाट्यशास्त्रम् = _____ + _____ । (एतत् + नाट्यशास्त्रम् / एतन्न + नाट्यशास्त्रम् / एत + नाट्यशास्त्रम्)

ii. समूहेतरपदं चित्वा लिखत। **[1]**

1. महानसः, पाकशाला, पाठशाला, पाकगृहम् 2. शिक्षा, शिक्षिका, आचार्या, अध्यापिका

iii. गद्यांशे आगते विशेषणे चित्वा रिक्तस्थाने पूरयत। **[1]**



iv. गद्यांशे आगते हेत्वर्थक-धातुसाधित-तुमन्त-अव्यये _____, _____ । **[1]**

अ 3. स्वमतप्रकटनम्। **[2]**

'नाट्ये विविधभावैः युक्तम् अभिनयम् आवश्यकम् अस्ति वा नास्ति' एतद्विषये भवतः मतं माध्यमभाषया लिखत।

कृतिः 1.ब. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।

ब 1. अवबोधनम्। (केऽपि 2 कृती कुरुत।)

i. उचितं पर्यायं चित्वा रिक्तस्थाने पूरयत। **[1]**

1. १९४७ नाम _____ ।
   (सप्त-चतुर्नव-एकतमे / एक-चतुर्नव-सप्ततमे)
2. १९६७ नाम _____ ।
   (षट्-नवैक-सप्ततमे / सप्त-षट्-नवैकतमे)

ii. पूर्णवाक्येन उत्तरं लिखत। **[1]**
कोलकत्तानगरे प्रदर्शनार्थं निर्मितस्य शिल्पस्य नाम किम्?

iii. वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यं वा इति लिखत। **[1]**
विनायकेन स्वग्रामोन्नत्यर्थं सदैव साहाय्यं कृतम्।

पुनश्च तेन कोलकत्तानगरे पारितोषिकार्हा शङ्खध्वनिः इति विशेषप्रतिमा प्रदर्शनार्थं निर्मिता। पुणेनगरस्थसैनिकशालायाः कृते छत्रपतिशिवाजीमहाराजस्य अश्वारूढप्रतिमानिर्माणकार्ये नियुक्तोऽसौ राजर्षि-शाहूमहाराजमहोदयेन। सार्धत्रयोदशफूट-परिमितोन्नतः अष्टटनभारः एष पुत्तलः अधुनापि सर्वेषां नेत्रसुखविषयः विराजते। यशसा कीर्त्या च विराजमानेनानेन वडोदरा-सांगली-मिरजादिसंस्थानिकानां कृते बहवः प्रतिमा निर्मिताः। तासु फलटणनगरस्था तेन निर्मिता मणिशिलामयी सन्तज्ञानेश्वरमहाराजस्य प्रतिमा विशेषरूपा।

सप्तचतुर्नवैकतमे ख्रिस्ताब्दे (1947) अमेरिकास्थितव्हिसकॉन्सिन-विद्यापीठेन विशेषरूपेणायं निमन्त्रितः। तत्रापि प्रेक्षकाणां पुरतः एव कुलगुरु-दलानमहोदयस्य प्रतिमानिर्माणं कृत्वा विदेशेऽपि स गौरवितः। मुम्बईनगरे उच्चन्यायालयस्य पुरतः, रवीन्द्रनाट्यमन्दिरे तथैव जहांगीर-आर्टसोसायटी इति संस्थायां करमरकरमहोदयस्य प्रतिभाविष्काररूपाणि शिल्पानि विराजन्ते।

न केवलं स शिल्पकारः स दयासागरः स्वराष्ट्रानुरागी च। स्वग्रामोन्नत्यर्थं तेन सदैव साहाय्यं कृतम्। अकिञ्चनच्छात्राणां कृते स शरण्यः। भूमिगतस्वातन्त्र्यसैनिकानां महाश्रयः खल्वासीत्। स्वजीवनं कृतार्थतां नीत्वा एष महान् शिल्पकारः सप्तषट्नवैकतमे (1967) ख्रिस्ताब्दे पञ्चत्वे विलीनः परं स्वप्रतिभानिर्मितशिल्पैः चिरजीवी सञ्जातः।

ब 2. शब्दज्ञानम्। (काः अपि 3 कृतीः कुरुत।)

i. उचितं पर्यायं चित्वा लिखत। **[1]**

1. नियुक्तोऽसौ = नियुक्तः + _____ ।
   (सौ / सः / असौ)
2. विराजमानेनानेन = _____ + अनेन।
   (विराजमानेन / विराजमाने / विराजमानेना)

ii. गद्यांशत: चित्वा चतुर्थपदं लिखत। **[1]**

1. दयानिधि: : दयासागर: :: निर्धन: : _____
2. मूर्ति: : प्रतिमा :: अग्रे : _____

iii. उचितं पर्यायं चित्वा स्तम्भपूरणं कुरुत। **[1]**

शङ्खध्वनि:	छत्रपतिशिवरायस्य प्रतिमा
पारितोषिकार्हा	_____
_____	अश्वारूढा

(विशेषप्रतिमा, पुणेनगरस्था, फलटणनगरस्था)

iv. गद्यांशे आगते केऽपि २ सप्तम्यन्तपदे चित्वा लिखत। **[1]**

ब. 3. पृथक्करणम्। **[2]**

यथाक्रमं घटना: लिखत।

i. छत्रपतिशिवाजीमहाराजस्य प्रतिमानिर्माणम्।
ii. सप्तषट्नवैकतमे ख्रिस्ताब्दे पञ्चत्वे विलीन:।
iii. शङ्खध्वनि: इति प्रतिमानिर्माणम्।
iv. व्हिसकॉन्सिन - विद्यापीठस्य निमन्त्रणम्।

कृति: 1.क. गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत।

क 1. अवबोधनम्। **(केऽपि 2 कृती कुरुत।)**

i. उचितं कारणं चित्वा वाक्यं पुनर्लिखत। **[1]**
ददातु मे नूतनचीवराणि। यत: _____।
(अद्य मे जन्मदिवस: / मम चीवराणि जीर्णानि)

ii. क: कं वदति? **[1]**
"तद् उपधानरूपेण गृह्णामि।"

iii. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत। **[1]**
भगवान् सुगत: नाम गौतमबुद्ध:।

अवन्तीगराद् बहिरासीद् विशालं रमणीयं तपोवनम्। पत्रपुष्पफलच्छायायुतै: वृक्षै: विराजमानं, विविधपशुपक्षिभि: समाश्रितं, तपोधनानां निवासस्थानं खल्वेतत्तपोवनम्।

तत्रासीदेक: विख्यात: बौद्धविहार:। भगवत: सुगतस्य बहवोऽनुयायिन: तत्रोषित्वा तथागतस्योपदेशमनुसरन्त: भिक्षुव्रतानां पालनं कुर्वन्ति स्म। भगवान् सुगत एवास्माकं पिता इत्येवं मन्यन्ते स्म ते भिक्षव:। अत: विविधसमस्यानां निराकरणार्थं ते स्वयं गौतमबुद्धं प्रति गच्छन्ति स्म।

एकदा कोऽपि भिक्षु: भगवन्तं प्रति जगाम। तं प्रणम्य अधोमुख: सोऽतिष्ठत्। भगवता पृष्ट: स: अकथयत्, "मम चीवराणि जीर्णानि अत: प्रार्थये ददातु मे नूतनचीवराणि।" तत: भगवता पृष्टं, "किं कृतं त्वया पुरातनचीवराणाम्?" स प्रत्यवदत्, "भगवन्, तत् चीवरं मया शयनीयरूपेणोपयोजितम्"। भगवान् पप्रच्छ "किं कृतं त्वया पुरातनशयनीयस्य?" स उवाच अहं रात्रौ तद् उपधानरूपेण गृह्णामिति। तदाकर्ण्य कुतुहलेन भगवान् अवोचत् "वत्स! कुत्रास्ति ते पुरातनमुपधानम्?"

क. 2. शब्दज्ञानम्। **(का: अपि 3 कृती: कुरुत।)**

i. उत्तरपदं लिखत। **[1]**

तत्रोषित्वा = तत्र + _____।
बहिरासीत् = बहि: + _____।

ii. विलोमशब्दानां मेलनं कुरुत। **[1]**

'अ'	'ब'
पुरातनम्	जीर्णम्।
अधोमुखः	न्नूतनम्।
	उन्मुखः।

iii. गद्यांशे आगते द्वे विशेषणे लिखत। **[1]**

तपोवनम् - _____ , _____।

iv. गद्यांशे आगते पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्यये - **[1]**

_____ , _____।

क. 3. प्रदेशाकारमनुसृत्य शब्दपेटिकां पूरयत। **[2]**



(तपोवनम्, भारतदेशः, बौद्धविहार, अवन्तीनगरम्)

द्वितीयः विभागः – पद्यम्।

कृतिः 2.अ. पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।

अ 1. पृथक्करणम्। **[2]**

जालरेखाचित्रं पूरयत।



सदा सद्ग्रन्थानां श्रवणमनने ये विदधते
नयन्ते वा कालं कविकृतविनोदैः प्रमुदिताः।
भ्रमं दूरीकुर्वन्ति च सदुपदेशेन कुधियां
स्वयं निर्भ्रान्तत्वात् प्रभुपदरतास्ते सुकृतिनः।।1।।

यस्य न ज्ञायते वीर्यं न कुलं न विचेष्टितम्।
न तेन सङ्गति कुर्यादित्युवाच बृहस्पतिः।।2।।

अ.2. स्पष्टीकरणम्।

द्वितीयस्य श्लोकस्य (यस्य न...) स्पष्टीकरणं माध्यमभाषया लिखत। **[2]**

कृतिः 2.ब. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।

आसीत् कोऽपि प्रतिष्ठाने तपोदत्त इति द्विजः।
स पित्रा क्लेश्यमानोऽपि विद्यां नाध्यैत शैशवे।।1।।
अनन्तरं गर्ह्यमाणः सर्वैरनुशयान्वितः।
स विद्यासिद्धये तप्तुं तपो गङ्गातटं ययौ।।2।।
तत्राश्रितोग्रतपसस्तस्य तं वीक्ष्य विस्मितः।
वारयिष्यन् द्विजच्छद्मा शक्रो निकटमाययौ।।3।।

अणुपूर्वं बृहत्पश्चाद् भवत्यार्येषु सङ्गतम्।
विपरीतमनार्येषु यथेच्छसि तथा कुरु।।4।।